# Kartikamasakrite Shiva Stuti Masa8

# कार्तिकमासकृते शिवस्तुतिः मास ८

## Document Information

Text title : Kartikamasakrite Shiva Stuti Masa 8

File name : kArtikamAsakRRiteshivastutiHmAsa8.itx

Category : shiva, shivarahasya, AratI, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 21 kArtikamAsArchanam | vAvRittashlokAH ||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

Kartikamasakrite Shiva Stuti Masa8

# कार्तिकमासकृते शिवस्तुतिः मास ८

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

विवासनजनावनऽऽवसितभूधरोमापते
विवासनिगमान्तिमप्रथिमधाम सीमाय ते ।
अहीनमुखभूषणप्रियवराय वार्यायते
हराय पुरभेदिने गजहराय तुभ्यं नमः ॥ ५८॥

गवामधिप शङ्कर त्रिणयनाव पाहीश्वर
प्रसीद परमेश्वर प्रमथनाथ सोमाङ्कधृक् ।
शरावरकृताब्धिसद्धरिशिरोरुगर्वोन्नत
त्रिषुस्थितपुरावर प्रकटहारिनेत्रोज्ज्वल ॥ ५९॥

मृगाजिनधरान्धकासुरनिबर्हणाऽऽशावस
समीकृतसुरासुरप्रसरणोरुवीर्याय ते ।
भवार्णवनिवासिनोद्धृतकरावलम्बाय
(भवार्णव निमग्नसज्जनकृतावलम्बाय)
वृषाङ्गवरचारिणे वासितचीरिणे (? ) ते नमः ॥ ६०॥

समीरणसुपारणप्रवरधारिणे वीरिणे
धराधिपसुतामितप्रकटसामिसद्वर्ष्मणे ।
गुणातिगगजाननप्रथमसामगण्याय ते
शरण्यपदपङ्कजानतसुपर्वशर्वाय ते ॥ ६१॥

उगणस्त्वं भगणाधिपोरुमौलि-
र्गणनाथोरुगुरुः पितासि शम्भो ।
शरणागतपालको महात्मा
वरुणार्च्यो भवहा पुरत्रयारिः ॥ ६२॥

पतिरेको भुवनस्य विश्वगस्त्वं
मयि दृष्टिं वितराद्य सम्मुखीनाम् ।
अधुना मधुनाधिकां महेश
विधुना चारुदृशा धुनोतु पापम् ॥ ६३॥

- -
इति स्तवेन मां स्तुत्वा नत्वा देवं महेश्वरम् ।
कार्तिक्यां पूर्णिमायां तु होमः कार्यो द्विजोत्तमः ॥ ६४॥

कपिलागोद्वयं देयं सवत्सं च सदक्षिणम् ।
मासं नक्ताशनो भूयात्सोमवारे उपोषितः ॥ ६५॥

कार्तिके सोमवारे तु पूज्येत परमेश्वरः ।
चतुर्षु रात्रियामेषु पायसं च निवेदयेत् ॥ ६६॥

द्रोणधुत्तूरबिल्वैश्च पूजयेत्सोमवासरे ।
एकं वापि च धुत्तूरं मयि दत्वा विलीयते ॥ ६७॥

सर्वेष्वापि च मासेषु सोमवारो वरो वरः ।
तत्रापि श्रावणः पुण्यः कार्तिकस्तच्छतोत्तरः ॥ ६८॥

विशेषात्कार्तिके मासि तस्मिन्पूजा मतोत्तरा ।
सोमार्द्रापातयुक्तो यः सोमवारः शिवे तदा ॥ ७४॥

सहस्रार्कग्रहैस्तुल्यः सर्वपापप्रणाशकृत् ।
तस्मिन्नभ्यर्चनं पुण्यं प्रशस्तं प्रीतिकृन्मम ॥ ७५॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं कार्तिकमासकृते शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः २१ कार्तिकमासार्चनम् । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 21 kArtikamAsArchanam . vAvRRittashlokAH ..

Notes:

Śiva शिव advises to Devī देवी; the ŚivaStutiḥ शिवस्तुतिः for the māsa मास while detailing about His Worship during the Kārtika māsa कार्तिक मास. He mentions about conducting

Homam होमम् during Kārtika Pūrṇimā कार्तिक पूर्णिमा and worshiping Him on Somavāra सोमवार - especially those that are Somādrāpātayukta सोमाद्रापातयुक्त.

The Kārtikamāsakṛte ŚivaŚatāṣṭanāmaStotram कार्तिकमासकृते शिवशताष्टनामस्तोत्रम् and the Kārtikamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ कार्तिकमासकृते शिवशताष्टनामावलिः comprising of 108 Names १०८ नामानि of Śiva शिव, derived from the same can be accessed from one of the links provided below.

More details about worshiping Śiva शिव during individual Māsa मास are given in Chapters 13-25.

Selected Śloka-s श्लोकाः from Chapter 21 are presented on this page.

Proofread by Ruma Dewan

---

*Kartikamasakrite Shiva Stuti Masa8*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*